॥ गुरूराजस्तवः ॥

सद्गुरूं भज सद्गुरूं भज सद्गुरूं भज बुद्धिमन्
येन संसृतिपारमेष्यसि मुक्त इत्यपि गास्यसे ।
आसुरीं त्यज सम्पदं विपदां पदं मुनिगर्हितां
तर्हि तां भज सम्पदं मुनिसंस्तुता भगवत्प्रियाम् ॥ १॥
गर्व-पर्वत-मस्तके तव संस्थितिर्न हि शोभते
पातमेष्यसि घातकर्मणि युज्यसे न तु पूज्यसे ।
सात्त्विकं फलमश्नुषे यदि सत्यवृत्तपरायणो
दनुजसूनुरिवामरद्रुममर्हणं भगवत्पदम् ॥ २॥
दम्भमार्गपरायणं यदि सत्फलाय भवत्यहो
इल्वलादिकृताऽपि विप्रवरार्चना विषमा कथम् ।
कष्टमेष्यसि दुष्टबुद्धिपरायणो यदि चाऽन्तरे
मृष्ट मृष्ट परं पदं तव दूरतः स्तवकर्मणाम् ॥ ३॥
मुक्तताऽपि मुमुक्षुता कपटौघमूलनिकृन्तनी
नीतिरर्भकता तथा यदि नास्ति जन्म निरर्थकम् ।
केषु ते गणना भवेद् वद विद्यवेद्यसमान्तरे
भासुरं जनजन्म कर्म निरर्थकं कुरूषे कुतः ॥ ४॥
साधुचित्तविखण्डनाद् भगवत्प्रियावपि दानवौ
तत्र साधुविघर्षणादपि राक्षसौ मुनिभक्षकौ ।
तेन हीनबलावथो नृपनामदूषकराक्षसौ
कृष्णहिंसन-तत्पराविति कर्मणो गहना गतिः ॥ ५॥
ब्रह्मनिष्ठ-विमाननान्निज-सूनुगीतहरेः पदे
द्वेष आविरभूद्भवग्रहमान्त्रिके निजसेविते ।
दानवस्य च दानधमंपरायणस्य च रक्षसः
शैवधर्मरतस्य मूलविनाशनोऽप्यघनाशने ॥ ६॥
जीवतामपहापयंच्छिवतां दिशत्यतिकौशलात्
पूर्ववत् स्थितविश्वमेष तिरष्करोत्यतिलीलया ।
तं गुरूं भज नम्रमोचनकारकं भवतारकं
तत्र शात्रवमत्र यच्छात वृक्षतां पितृकानने ॥ ७॥
श्रीगुरोः पदपंकजं भजता सतां सततं हरिः
सन्निधाविति सर्वशासनसारमेतदुदीरितम् ।
तन्महत्वमहाम्बुधेरपरं तटं न हि केचन
प्राप्तुवन्ति परावरज्ञा पण्डिताः सनकादयः ॥ ८॥

शब्दमूलमहो गुरूः शिवजीवविश्वभिदास्पदं
विश्वजीवशिवादिनामत एष एव हि बुध्यते ।
वाच्यकोटिनिविष्टमेव हि तत्त्रयं कृतपत्त्रयं
लक्ष्यभूतवपुर्गुरूस्तमु जानते न हि केचन ॥ ९ ॥
वृत्त्यनाश्रितचित्स्वरूपक एष एव समः प्रभो
वृत्तिरूढचिदम्बरं खलु जीव ईश इदं जगत् ।
जन्म-मृत्यु-नियामकः परमेश्वरः स तु भोगभुग्
जन्म-मृत्यु-निवारकः परमेश्वरादतिरिच्यते ॥ १० ॥
ब्रह्मरन्ध्रपदं गुरोर्हृदयं शिवस्य निजास्पदं
स्थानमेव हि तत्स्वरूप-विनिर्णयाय भवत्फलम् ।
हृद्यतो विषयान् भजत्यथ नैव किंचन रन्ध्रगो
यच्छति क्रमतः फलं वद मुक्तिदोस्त्यनयोऽस्तुकः ॥ ११ ॥
तत्स्वरूपविमर्शनं गुरूपादुकामनुसंशितं
तन्मनुस्तु तदीयपूर्णकृपाभरेण हि लभ्यते ।
लाभतो गुरूणा सहैक्यविमर्शनं परमं पदं
तत्र मुक्तिवरांगना वृणुते स्वयं निजसम्पदा ॥ १२ ॥
तत्र यो विमुखो नरो निजघातकीर्ति निगद्यते
तस्य सम्मुखतां भजन् परमद्वयं भवति क्षणात् ।
ऋक्श्रुतिः शतधारमित्यपि नौति तां गुरूपादुकां
कृष्णभिक्षुरिमं स्तवं पदपंकजेऽर्पयते गुरोः ॥ १३ ॥
द्रोणपर्वतवासिने नतशासिने मतिकाशिने
हारिणे विपदां मुहुर्मम दायिनेऽखिल सम्पदाम् ।
सच्चिदादिसुखाभिधाय यतीश्वराय सहस्रशः
सन्त मे नतयो दयोदकसागराय दिने दिने ॥ १४ ॥
स्तोत्रमेतदभीष्टसिद्धिद-मासुरव्रत-हारकं
तारकं निजदेशि-केन्द्रपदाब्जयोदृ् ढसन्मतेः ।
यः पठेत् प्रयतः शुचिः सुविचार्य भूरि दिने दिने
मुच्यते भवपाशपाशित एवमेव मतिर्मम ॥ १५ ॥
॥ इति श्रीमत्कृष्णानंद-सरस्वतीकृत-गुरूराजस्तवः सम्पूर्णम् ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.
